# आचार्यप्रथमवर्षम्

## तृतीयपत्रम्-प्राचीनन्यायवैशेषिकम्

## शैक्षिकनिष्पत्तिः

**ग्रन्थः प्रशस्तपादभाष्यम् -आदितः गुणनिरूपणान्तम्**

**अमुं पाठ्यग्रथम् अधीत्य छात्राः -**

- ❖द्रव्याणां गुणानां साधर्म्यवैधर्म्ये, परमाणुसाधनं, च अवगन्तुं शक्नुवन्ति।
- ❖विद्याविद्ययोः भेदम्, आर्षज्ञानम्, अनध्यवसायं, , सिद्धदर्शनं, योगिप्रत्यक्षम् अवगन्तुं शक्नुवन्ति।
- ❖आश्रमिणां धर्महेतुं, कृतदारविद्याव्रतस्नातकानां धर्महेतुं , वर्णधर्मम् आश्रमधर्मं, धर्माधर्मकर्तृत्वं ज्ञातुं शक्नुवन्ति।
- ❖ईश्वरस्य नित्यमुक्तत्वं, षड्गुणाश्रयत्वमतं, मोक्षस्य ज्ञानपूर्वकधर्महेतुकत्वं, मुक्तेः पुरुषार्थत्वं, ज्ञानकर्मसमुच्चयवादं, सृष्टिसंहारविधिं च अवगन्तुं शक्नुवन्ति।
- ❖तमसो भाभावरूपत्वम्,अर्थापत्तिचेष्टादीनां क्लृप्तेषु प्रमाणेषु अन्तर्भावं , शौर्यकामक्रोधादीनां क्लृप्तगुणेषु अन्तर्भावं च ज्ञातुं शक्नुवन्ति।
- ❖पिठरपाकवादपरिशीलनं , पीलुपाकवादपरिष्कारं, ज्ञाततावादपरिशीलनं , स्फोटवाद-स्वप्रकाशवादपरिशीलनं , विज्ञानवादिमतपरिशीलनं कर्तुमर्हन्ति।
- ❖प्रत्यक्षानुमानयोः बलाबलं, लिङ्गाभासं , स्वार्थानुमानं, स्वप्नलक्षणविभागौ च अवगन्तुं शक्नुवन्ति।
- ❖दिक्कालयोः सर्वोत्पत्तिनिमित्तत्वं , इन्द्रियाणां प्राप्यकारित्वम्, असत्कार्यवादं ज्ञातुं शक्नुवन्ति।